प.2

॥ चाणक्य शतकम् ॥

चाणक्यशतकम् ।

श्रीचाणक्यपण्डितविरचितम् ।

पण्डितकुलपतिना,
बि, ए, उपाधिधारिणा
श्रीमज्जीवानन्दविद्यासागरभट्टाचार्य्येण
विरचितया व्याख्यया समलङ्कृतम् ।

तदात्मजाभ्यां
पण्डित-श्रीआशुबोधविद्याभूषण-
पण्डित-श्रीनित्यबोधविद्यारत्नाभ्यां
संस्कृतं प्रकाशितञ्च ।

पञ्चम संस्करणम् ।

कलिकातामहानगर्य्याम्
वाचस्पत्ययन्त्रे
मुद्रितम् ।

इं १९२६ ।

 मूल्यम् आनकत्रयम् ।

चाणक्यशतकम् ।

श्रीचाणक्यपण्डितविरचितम् ।

पण्डितकुलपतिना,

वि, ए, उपाधिधारिणा

श्रीमज्जीवानन्दविद्यासागरभट्टाचार्य्येण

विरचितया व्याख्यया समलङ्कृतम् ।

तदात्मजाभ्यां

पण्डित-श्रीआशुबोधविद्याभूषण-

पण्डित-श्रीनित्यबोधविद्यारत्नाभ्यां

संस्कृतं प्रकाशितञ्च ।

पञ्चम संस्करणम् ।

कलिकातामहानगर्य्याम्

वाचस्पत्ययन्त्रे

मुद्रितम् ।

ई १९२६ ।

प्रकाशक— पण्डित-श्रीआशुबोध-विद्याभूषण
तथा
पण्डित-श्रीनित्यबोध-विद्यारत्न।

प्राप्तिस्थान— २नं०, रमानाथ मजुमदार ष्ट्रीट्, आम्हार्ष्ट ष्ट्रीट् पोष्ट-अफिस। कलिकाता।

प्रिण्टर—बि, बि, मुखर्जी।
२ नं०, रमानाथ मजुमदार ष्ट्रीट्, कलिकाता।

चाणक्यशतकम् ।

अवतरणिका ।—

नानाशास्त्रोद्धृतं वक्ष्ये राजनीतिसमुच्चयम् ।
सर्वबीजमिदं शास्त्रं चाणक्यं सारसंग्रहम् ॥ १ ॥
मूलसूत्रं प्रवक्ष्यामि चाणक्येन यथोदितम् ।
यस्य विज्ञानमात्रेण मूर्खो भवति पण्डितः ॥२॥

अथ ग्रन्थारम्भः ।—

विद्वत्त्वञ्च नृपत्वञ्च नैव तुल्यं कदाचन ।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते ॥ ३ ॥

नानेति ।—नाना विविधानि शास्त्राणि नानाशास्त्राणि तेभ्यः उद्धृतम् आहृतं राज्ञां नीतयः राजनीतयः राजकर्त्तव्याकर्त्तव्यशासनानि तेषां समुच्चयः संग्रहः यस्मिन् तथोक्तं सर्वेषां शास्त्राणाम् इति भावः, वीजं निदानं सारस्य शास्त्रप्रतिपाद्यविषयस्य संग्रहः सम्यक् ग्रहणं यस्मिन् तथाभूतम् इदं चाणक्यस्य इदं चाणक्यं चाणक्यपण्डितप्रणीतम् इत्यर्थः, स्वार्थे ष्णप्रत्ययः। शिष्यते उपदिश्यते अस्मिन् इति शास्त्रम् उपदेशग्रन्थम् इत्यर्थः, वक्ष्ये कथयिष्यामि ॥ १ ॥

मूलेति ।—चाणक्येन यथा उदितं गदितं मूलसूत्रं मूलं निदानं ज्ञानस्य इति शेषः, तस्य सूत्रं सूचकवचनम् इत्यर्थः, प्रवक्ष्यामि प्रकर्षेण कथयिष्यामि। यस्य मूलसूत्रस्य विज्ञानमात्रेण बोधमात्रेण मूर्खो जनः पण्डितः प्राज्ञः भवति ॥२॥

विद्वत्त्वमिति ।—विद्वत्त्वं पाण्डित्यं नृपत्वं राजत्वं च कदाचन तुल्यं समं नैव भवतीति शेषः। यतः राजा स्वदेशे

पण्डिते च गुणाः सर्वे मूर्खे दोषा हि केवलम् ।
तस्मात् मूर्खसहस्रेषु प्राज्ञ एको विशिष्यते ॥४॥
मातृवत् परदारेषु परद्रव्येषु लोष्ठवत्
आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः ॥५॥
किं कुलेन विशालेन गुणहीनस्तु यो नरः ।
अकुलीनोऽपि शास्त्रज्ञो दैवतैरपि पूज्यते ॥६॥
रूपयौवनसम्पन्ना विशालकुलसम्भवाः ।

स्वाधिकृतदेशे एव, न तु अन्यदेशे इत्येवशब्दार्थः, पूज्यते आद्रियते, विद्वान् पण्डितः सर्वत्र देशे स्वदेशे विदेशे च इत्यर्थः, पूज्यते आद्रियते विद्यायाः राजत्वापेक्षया गौरवात् इति भावः ॥३॥

पण्डिते इति ।—पण्डिते विदुषि सर्वे गुणाः दयादाक्षिण्यादयः वर्त्तन्ते इति शेषः, मूर्खे केवलं दोषाः परहिंसादयः वर्त्तन्ते इति शेषः। तस्मात् मूर्खाणां सहस्रेषु मध्ये एकः प्राज्ञः पण्डितः विशिष्यते विशेषेण पूज्यते इत्यर्थः ॥ ४ ॥

मातृवदिति ।—यः परदारेषु परस्त्रीषु मातृवत्, परद्रव्येषु परधनेषु लोष्ठवत् मृत्पिण्डवत्। किमधिकेन सर्वाणि भूतानि प्राणिनः तेषु आत्मवत् पश्यति अवलोकयति विचारयतीति भावः, सः पण्डितः विद्वान्। सर्वभूतेषु आत्मवद्दर्शनेनैव पूर्वार्द्धवाक्यार्थस्य चरितार्थत्वेऽपि उत्तरार्द्धवाक्यार्थस्य प्रदर्शनार्थमुक्तिरिति बोध्यम् ॥ ५ ॥

किमिति ।—यो नरः गुणहीनः अविद्वानित्यर्थः, तस्य विशालेन महता कुलेन वंशेन किम् ? न किमपि प्रयोजनम् इत्यर्थः। अकुलीनः नीचकुलोत्पन्नोऽपि जनः शास्त्रज्ञश्चेदिति शेषः, दैवतैरपि पूज्यते आद्रियते ॥ ६ ॥

विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः॥७॥
ताराणां भूषणं चन्द्रो नारीणां भूषणं पतिः ।
पृथिव्या भूषणं राजा विद्या सर्वस्य भूषणम् ॥८॥
माता शत्रुः पिता वैरी येन बालो न पाठितः ।
न शोभते सभामध्ये हंसमध्ये वको यथा ॥९॥
वरमेको गुणी पुत्रो न च मूर्खशतैरपि ।

रूपेति ।—रूपेण सौन्दर्य्येण यौवनेन च सम्पन्नाः युक्ताः रूपवन्तः युवानश्चेत्यर्थः, विशाले महति कुले सम्भवः जन्म येषां तथाभूताः महाकुलीना इत्यर्थः, जना विद्याहीनाश्चेदिति शेषः, निर्गन्धाः सौरभरहिताः किंशुका इव पलाशा इव शाल्मली-कुसुमानि इव इति केचित्, न शोभन्ते न विराजन्ते न कैरपि आद्रियन्ते इति भावः ॥ ७ ॥

ताराणामिति ।—चन्द्रः ताराणां नक्षत्राणां भूषणम् अलङ्कारः चन्द्रेण नक्षत्राणि अलङ्क्रियन्ते इत्यर्थः, पतिः नारीणां भूषणम् अलङ्कारः पतिरहिता हि नैव शोभन्ते प्रत्युत गतश्रियो भवन्ति इति भावः । राजा पृथिव्याः भूषणम् अलङ्कारः अराजका पृथ्वी नैव शोभते प्रत्युत गतश्रीरेव भवति इति भावः । विद्या सर्वस्य जनस्य भूषणम् अलङ्कारः अविद्यस्तु नैव शोभते इति भावः ॥८॥

मातेति ।—माता जननी शत्रुः, पिता च वैरी शत्रुः, येन हेतुना बालः शिशुः न पाठितः न शिक्षितः ताभ्यामिति शेषः, बालकानां शिक्षादानविमुखौ मातापितरौ तेषां शत्रू भवतः इति फलितार्थः । यतः स बालः हंसानां मध्ये वको यथा वक इव सभामध्ये न शोभते ॥ ९ ॥

वरमिति ।—एको गुणी गुणवान् पुत्रः वरं मनाक्प्रियः

एकश्चन्द्रस्तमो हन्ति न च तारागणैरपि ॥१०॥
लालयेत् पञ्च वर्षाणि दश वर्षाणि ताड़येत् ।
प्राप्ते तु षोड़शे वर्षे पुत्त्रं मित्रवदाचरेत् ॥११॥
लालने बहवो दोषास्ताड़ने बहवो गुणाः ।
तस्मात् पुत्त्रञ्च शिष्यञ्च ताड़येत् न तु लालयेत् ॥१२॥
एकेनापि सुवृक्षेण पुष्पितेन सुगन्धिना ।
वासितं स्यात् वनं सर्वं सुपुत्त्रेण कुलं यथा ॥१३॥
एकस्यापि कुवृक्षस्य कोटरस्थेन वह्निना ।

इत्यर्थः, "देवाहृते वरः श्रेष्ठे त्रिषु क्लीवे मनाक्प्रिये" इत्यमरः । मूर्खाणां शतैरपि न च प्रयोजनमिति शेषः । मूर्खपुत्त्रशतमपि निष्प्रयोजनम् इत्यर्थः । एकः अद्वितीयः चन्द्रः तमः तिमिरं हन्ति नाशयति, ताराणां नक्षत्राणां गणैरपि समूहैरपि न च तमः हन्यते इति अध्याहार्य्यम् ॥ १० ॥

लालयेदिति ।—पञ्च वर्षाणि अत्यन्तसंयोगे द्वितीया, लालयेत् सयत्नं पालयेत् इत्यर्थः । दश वर्षाणि ताड़येत्, षोड़शे वर्षे प्राप्ते तु मित्रवत् मित्रमिव आचरेत् व्यवहरेत् पुत्त्रमिति योज्यम् ॥ ११ ॥

लालने इति ।—लालने सयत्नपालने षष्ठवर्षादिषु इति भावः, बहवः दोषाः दुर्विनयादयः, ताड़ने बहवः गुणाः विनयादयः जायन्ते इति शेषः ।—तस्मात् पुत्त्रं शिष्यञ्च षष्ठादिवर्षीयमिति भावः, ताड़येत् न तु लालयेत् ॥ १२ ॥

एकेनापीति ।—एकेनापि पुष्पितेन सञ्जातपुष्पेण सुगन्धिना सुवृक्षेण आम्रादिना सुपुत्त्रेण गुणवत्पुत्त्रेण कुलं यथा इव सर्वं वनं वासितं सुरभीकृतं स्यात् भवेत् । सुपुत्त्रः कुलगौरवकर इति भावः ॥ १३ ॥

दह्यते हि वनं सर्वं कुपुत्त्रेण कुलं यथा ॥ १४ ॥
दूरतः शोभते मूर्खो लम्बमानपटावृतः ।
तावच्च शोभते मूर्खो यावत् किञ्चिन्न भाषते॥१५॥
विषादप्यमृतं ग्राह्यममेध्यादपि काञ्चनम् ।
नीचादप्युत्तमा विद्या स्त्रीरत्नं दुष्कुलादपि ॥१६॥
उत्सवे व्यसने चैव दुर्भिक्षे शत्रुविग्रहे ।
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः॥१७॥
परोक्षे कार्य्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।

एकस्यापीति ।—कुपुत्त्रेण मूर्खपुत्त्रेण कुलं यथा इव एकस्यापि कुवृक्षस्य कोटरस्थेन वह्निना अग्निना हि निश्चितं सर्वं वनं दह्यते भस्मीक्रियते। मूर्खपुत्त्रः कुलध्वंसकर इति भावः ॥१४॥

दूरत इति ।—लम्बमानेन आयतेन पटेन वस्त्रेण आवृतः आच्छादितः सुपरिच्छद इत्यर्थः, मूर्खः दूरतः शोभते। किन्तु स मूर्खः तावत् शोभते सभायाम् इति शेषः, यावत् किञ्चित् न भाषते न वदति। कथनेनैव तस्य मूर्खत्वप्रकाशनात् शोभाविरह इति भावः ॥१५॥

विषादिति ।—अमृतं विषादपि गरलादपि, काञ्चनं स्वर्णम् अमेध्यात् अपवित्रादपि स्थानादित्यर्थः, उत्तमा विद्या नीचात् निकृष्टजातीयादपि, स्त्रीरत्नं दुष्कुलात् नीचकुलादपि ग्राह्यं ग्रहणीयम् ॥ १६ ॥

उत्सवे इति ।—यः उत्सवे सम्पदि, व्यसने विपदि, दुर्भिक्षे अन्नाभावसमये इत्यर्थः, शत्रुभिः सह विग्रहे विरोधे, राजद्वारे नृपतिगृहे श्मशाने शवसत्कारस्थाने च तिष्ठति साहाय्यं करोति इति भावः, स बन्धुरेव बान्धवः। स्वार्थे ष्णप्रत्ययः ॥ १७ ॥

वर्जयेत् तादृशं मित्रं विषकुम्भं पयोमुखम् ॥१८॥
सकृद्दुष्टञ्च मित्रं यः पुनः सन्धातुमिच्छति ।
स मृत्युमुपगृह्णाति गर्भमश्वतरी यथा ॥ १९ ॥
न विश्वसेदविश्वस्तं मित्रञ्चापि न विश्वसेत् ।
कदाचित् कुपितं मित्रं सर्वदोषं प्रकाशयेत् ॥२०॥
जानीयात् प्रेषणे भृत्यान् बान्धवान् व्यसनागमे ।
मित्रञ्चापदि काले च भार्य्याञ्च विभवक्षये ॥२१॥
उपकारगृहीतेन शत्रुणा शत्रुमुद्धरेत् ।

परोक्षे इति।—परोक्षे गोपने इति भावः, कार्य्यहन्तारं कार्य्यनाशकं प्रत्यक्षे समक्षे प्रियवादिनं जनं वर्जयेत् त्यजेत्, यतः तादृशं तथाभूतं मित्रं सुहृदं पयः क्षीरं मुखे यस्य तादृशं विषकुम्भं विषकलसस्वरूपम् इव स्थितं जानीयात् इति शेषः ॥१८॥

सकृदिति।—यः सकृत् एकवारं दुष्टं विरुद्धम् इत्यर्थः, मित्रं पुनः सन्धातुं मेलयितुं प्रणयेन ग्रहीतुमिति यावत्, इच्छति, सः अश्वतरी कर्कटी गर्भमिव, न तु अश्वायां गर्दभेन जाता अश्वतरी इत्यर्थः युज्यते, तस्या गर्भस्य मृत्युकारणत्वेन अदर्शनात् अप्रसिद्धेश्चेति बोध्यम्। मृत्युम् उपगृह्णाति आश्रयति ॥ १९ ॥

नेति।—अविश्वस्तं जनं न विश्वसेत्, मित्रञ्चापि अविश्वस्तं न विश्वसेत्। कुपितं मित्रं क्रुद्धो बन्धुः कदाचित् सर्वदोषं निखिलं गुह्यदोषं प्रकाशयेत् ॥ २० ॥

जानीयादिति।—भृत्यान् दासान् प्रेषणे नियोगे आज्ञापालने इत्यर्थः, बान्धवान् ज्ञातीन् भ्रात्रादीनित्यर्थः, व्यसनागमे रोगाद्यभिभवे इत्यर्थः, मित्रं सुहृदम् आपदि, भार्य्यां पत्नीं विभवानां सम्पदां क्षयो यत्र तादृशे काले च, जानीयात् सदसत्त्वेन बुध्येत ॥२१॥

पादलग्नं करस्थेन कण्टकेनेव कण्टकम् ॥२२॥
न कश्चित् कस्यचित् मित्रं न कश्चित् कस्यचिद्रिपुः ।
कारणेन हि जानाति मित्राणि च रिपूंस्तथा ॥२३॥
दुर्जनः प्रियवादी च नैतद्विश्वासकारणम् ।
मधु तिष्ठति जिह्वाग्रे हृदये तु हलाहलम् ॥२४॥
दुर्जनः परिहर्त्तव्यो विद्ययाऽलङ्कृतोऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयङ्करः ? ॥२५॥
सर्पः क्रूरः खलः क्रूरः सर्पात् क्रूरतरः खलः ।

उपकारेति ।—उपकारेण गृहीतः वशीकृतः तेन शत्रुणा मित्रभूतेनेति भावः, शत्रुं करस्थेन कण्टकेन पादलग्नं चरणविद्धं कण्टकम् इव उद्धरेत् उत्पाटयेत् ॥ २२ ॥

नेति ।—कश्चित् जनः कस्यचित् जनस्य मित्रं न, कश्चित् जनः कस्यचित् जनस्य रिपुः शत्रुः न, मित्राणि तथा रिपून् कारणेन व्यवहारेणेति यावत्, जानाति जन इति शेषः ॥२३॥

दुर्जन इति ।—यतः अयं दुर्जनः दुष्टो जनः, प्रियवादी च इत्येतत् विश्वासस्य कारणं न, नैव विश्वसनीय इत्यर्थः । यतः जिह्वाग्रे अस्य इति शेषः, मधु तिष्ठति, तु किन्तु हृदये अन्तःकरणे हलाहलं विषं तिष्ठति इति शेषः ॥ २४ ॥

दुर्जन इति ।—दुर्जनः दुष्टो लोकः विद्यया अलङ्कृतोऽपि भूषितोऽपि सन् परिहर्त्तव्यः परित्याज्यः तत्संसर्गो न विधेय इति भावः । सर्पः मणिना मूर्द्धन्येन रत्नेन इत्यर्थः, भूषितः चेदिति शेषः, असौ मणिभूषितः सर्पः किं भयङ्करो न ? अपि तु भयङ्कर एव इत्यर्थः ॥ २५ ॥

सर्प इति ।—सर्पः क्रूरः निष्ठुरः, खलः दुर्जनः क्रूरः निष्ठुरः,

मन्त्रौषधिवशः सर्पः खलः केन निवार्य्यते ? ॥२६॥
नखिनाञ्च नदीनाञ्च शृङ्गिणां शस्त्रपाणिनाम् ।
विश्वासो नैव कर्त्तव्यः स्त्रीषु राजकुलेषु च ॥२७॥
हस्ती हस्तसहस्रेण शतहस्तेन वाजिनः ।
शृङ्गिणो दशहस्तेन स्थानत्यागेन दुर्जनः ॥२८॥
आपदर्थं धनं रक्षेत् दारान् रक्षेत् धनैरपि ।
आत्मानं सततं रक्षेत् दारैरपि धनैरपि ॥२९॥
परदारं परद्रव्यं परिवादं परस्य च ।

किन्तु खलः सर्पात् सर्पमपेक्ष्य इत्यर्थः, क्रूरतरः अतिशयेन क्रूरः। यतः सर्पः मन्त्रौषधिभ्यां वशीकर्त्तुं शक्यः इत्यर्थः । खलः केन निवार्य्यते ? वशीक्रियते, न केनापि इत्यर्थः ॥ २६ ॥

नखिनाञ्चेति।—नखिनां नखायुधानां सिंहव्याघ्रादीनाम् इत्यर्थः, नदीनां स्रोतस्वतीनां शृङ्गिणां गोमहिषादीनां शस्त्रपाणिनाम् अस्त्रधारिणाञ्च तथा स्त्रीषु राजकुलेषु च विश्वासः प्रत्ययः नैव कर्त्तव्यः ॥ २७ ॥

हस्तीति।—हस्ती हस्तसहस्रेण परिहर्त्तव्य इति शेषः, वाजिनः अश्वाः शतहस्तेन परिहर्त्तव्या इति शेषः, शृङ्गिणः गोमहिषादयः दशहस्तेन परिहर्त्तव्या इति शेषः। दुर्जनः स्थानत्यागेन सन्निहितवासत्यागेन परिहर्त्तव्य इति शेषः ॥ २८ ॥

आपदर्थमिति।—आपदर्थं विपत्पातनिवारणार्थं धनं रक्षेत्, धनैः धनव्ययैरपि दारान् कलत्राणि रक्षेत्, दारैरपि धनैरपि आत्मानं सततं रक्षेत्। आत्मरक्षणे हि सर्वरक्षणं स्यात्, यतः आत्मार्थमेव सर्वमिति ॥ २९ ॥

परदारमिति।—परदारं परस्त्रियं परद्रव्यं परधनं परस्य

परिहासं गुरोः स्थाने चापल्यञ्च विवर्जयेत्॥३०॥
त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्॥३१॥
चलत्येकेन पादेन तिष्ठत्येकेन बुद्धिमान्।
नासमीक्ष्य परं स्थानं पूर्वमायतनं त्यजेत्॥३२॥
लुब्धमर्थेन गृह्णीयात् क्रुद्धमञ्जलिकर्मणा।
मूर्खं छन्दोऽनुवृत्तेन तथा तथ्येन पण्डितम्॥३३॥

अन्यस्य परिवादं निन्दां परिहासम् उपहासञ्च तथा गुरोः पित्रादेः स्थाने सविधे चापल्यं प्रागल्भ्यं विवर्जयेत् त्यजेत् ॥३०॥

त्यजेदिति।—कुलस्य वंशस्य अर्थे निमित्तं वंशरक्षार्थमित्यर्थः, एकं द्रव्यमिति शेषः, त्यजेत्, ग्रामस्य ग्रामीणजनसमूहस्य इत्यर्थः, अर्थे कुलं वंशं त्यजेत्, जनपदस्य देशस्य नगरस्येत्यर्थः, अर्थे देशरक्षार्थमित्यर्थः, ग्रामं ग्रामीणजनसमूहं स्वनिवासभूतं वा त्यजेदिति शेषः। आत्मार्थे स्वरक्षार्थम् इत्यर्थः, पृथिवीं त्यजेत्॥ ३१॥

चलतीति।—बुद्धिमान् जनः एकेन पादेन चलति तथा एकेन अपरेण इत्यर्थः, पादेन तिष्ठति स्थानस्य त्यागमत्यागञ्च विवेचयतीति भावः। यतः परम् अन्यत् स्थानम् असमीक्ष्य अविचार्य्य सदसत्त्वेनेति शेषः, पूर्वम् आयतनं स्थानं न त्यजेत्॥ ३२॥

लुब्धमिति।—अर्थेन धनेन लुब्धं जनम्, अञ्जलिकर्मणा प्रणत्या इति भावः, क्रुद्धं जनं छन्दोऽनुवृत्तेन छन्दः अभिप्रायः छन्दोऽभिप्राय आशय इत्यमरः। आशयानुरूपकार्य्यकरणेन इत्यर्थः, मूर्खं जनं तथा तथ्येन सत्येन पण्डितं ज्ञानिनं जनं गृह्णीयात् वशीकुर्य्यादित्यर्थः॥ ३३॥

अर्थनाशं मनस्तापं गृहे दुश्चरितानि च ।
वञ्चनञ्चापमानञ्च मतिमान् न प्रकाशयेत् ॥३४॥
धनधान्यप्रयोगेषु तथा विद्यागमेषु च ।
आहारे व्यवहारे च त्यक्तलज्जः सदा भवेत् ॥३५॥
धनिनः श्रोत्रियो राजा नदी वैद्यस्तु पञ्चमः ।
पञ्च यत्र न विद्यन्ते तत्र वासं न कारयेत् ॥३६॥

अर्थनाशमिति।—मतिमान् प्राज्ञः जनः अर्थनाशं धनक्षयं मनस्तापं मनोदुःखं गृहे दुश्चरितानि दुराचरणानि, वञ्चनं प्रतारणम् अपमानञ्च न प्रकाशयेत् प्रकाशने स्वस्यैव अगौरवं स्यादिति भावः ॥ ३४ ॥

धनेति।—धनानां धान्यानाञ्च प्रयोगेषु ऋणादित्वेन दानादिव्यवहारेषु इत्यर्थः, तथा विद्यागमेषु विद्योपार्जनेषु आहारे भोजने च व्यवहारे व्यवसाये वाणिज्ये च इत्यर्थः, सदा सर्वस्मिन् काले त्यक्ता लज्जा येन तथाभूतः भवेत् लज्जायां तत्तत्कार्य्यहानिः स्यादिति बोध्यम् ॥३५॥

धनिन इति।—धनिनः धनवन्तः श्रोत्रियः वेदवित् ब्राह्मण इत्यर्थः, "श्रोत्रियच्छान्दसौ समौ" इत्यमरः। राजा, नदी, पञ्चानां पूरणः पञ्चमः वैद्यः चिकित्सकः "भिषग्वैद्यौ चिकित्सके" इत्यमरः। एते पञ्च यत्र स्थाने इति शेषः, न विद्यन्ते, तत्र स्थाने वासं न कारयेत् न च कुर्य्यात् इति स्वयमेवार्थो बोद्धव्यः, कुर्य्यात् इत्यर्थे स्वार्थे णिजन्तप्रयोगः। गृहिणां सततमर्थस्य आवश्यकतया तस्य च धनिसन्निधौ सुलभतया धनिनां सन्निधाने स्थितिरावश्यकी। ज्ञानानुशीलनस्य सर्वेषामेव उपयोगित्वात् श्रोत्रियसन्निधिरावश्यकः। विवादनिराकरणाद्यर्थं राजसन्निधिरावश्यकः। नदीसत्ता च अनावृष्टावपि शस्याद्युत्पादनेन दुर्भिक्षनिवृत्तिः वाणिज्यादीनां सौकर्य्यञ्च स्यात्। रोगप्रतीकारार्थं चिकित्सकसत्ता आवश्यकीति बोध्या ॥ ३६ ॥

यस्मिन् देशे न सम्मानो न प्रीतिर्न च बान्धवाः।
न च विद्यागमः कश्चित् तं देशं परिवर्जयेत् ॥३७॥
मनसा चिन्तितं कर्म वचसा न प्रकाशयेत्।
अन्यलक्षितकार्य्यस्य यतः सिद्धिर्न जायते ॥३८॥
कुदेशञ्च कुवृत्तिञ्च कुभार्य्यां कुनदीं तथा।
कुद्रव्यञ्च कुभोज्यञ्च वर्जयेत् तु विचक्षणः ॥३९॥
ऋणशेषोऽग्निशेषश्च व्याधिशेषस्तथैव च।
पुनश्च वर्द्धते यस्मात् तस्मात् शेषं न कारयेत् ॥४०॥
चिन्ता ज्वरो मनुष्याणां वस्त्राणामातपो ज्वरः।

यस्मिन्निति।—यस्मिन् देशे सम्मानः न, प्रीतिः सन्तोषः न, बान्धवाश्च न, कश्चित् विद्यागमश्च विद्योपार्जनोपायश्च इत्यर्थः, न, अस्तीति शेषः, तं देशं परिवर्जयेत् परित्यजेत् ॥ ३७ ॥

मनसेति।—मनसा चिन्तितं निर्णीतं कर्म वचसा वाक्येन न प्रकाशयेत्। यतः अन्यैः लक्षितं यत् कार्य्यं तस्य सिद्धिः न जायते न भवति इत्यर्थः ॥ ३८ ॥

कुदेशञ्चेति।—विचक्षणः प्राज्ञो जनः कुदेशं कुवृत्तिं कुत्सितां जीविकाम् इत्यर्थः, कुभार्य्यां दुष्टां भार्य्याम् इत्यर्थः, कुनदीं कुम्भीरादिभयशालिनीं नदीम् इत्यर्थः, कुद्रव्यं कुभोज्यं कुत्सितं भक्ष्यञ्च वर्जयेत् त्यजेत्। तुशब्दोऽत्र निश्चयार्थः ॥ ३९ ॥

ऋणशेष इति।—यस्मात् ऋणस्य शेषः, अग्नेः शेषः तथा व्याधेः रोगस्य शेषः पुनश्च वर्द्धते वृद्धिं गच्छति, तस्मात् शेषं, तेषामिति शेषः, न कारयेत् न रक्षेत्, सर्वमेव सम्यक् प्रतिकुर्य्यादित्यर्थः ॥ ४० ॥

असौभाग्यं ज्वरः स्त्रीणामश्वानां मैथुनं ज्वरः ॥४१॥

अस्ति पुत्त्रो वशे यस्य भृत्यो भार्य्या तथैव च ।
अभावेऽप्यतिसन्तोषः स्वर्गस्थोऽसौ महीतले ॥४२॥

दुष्टा भार्य्या शठं मित्रं भृत्यश्चोत्तरदायकः ।
ससर्पे च गृहे वासो मृत्युरेव न संशयः ॥४३॥

माता यस्य गृहे नास्ति भार्य्या चाप्रियवादिनी ।
अरण्यं तेन गन्तव्यं यथाऽरण्यं तथा गृहम् ॥४४॥

ऋणकर्त्ता पिता शत्रुर्माता च व्यभिचारिणी ।
भार्य्या रूपवती शत्रुः पुत्त्रः शत्रुरपण्डितः ॥४५॥

चिन्तेति।—चिन्ता मनुष्याणां ज्वरः, आतपः वस्त्राणां ज्वरः, असौभाग्यं पत्युः अप्रियत्वं स्त्रीणां ज्वरः, मैथुनम् अश्वानां ज्वरः। चिन्तादिभिः एते जीर्णा भवन्ति इति तात्पर्य्यार्थः ॥४१॥

अस्तीति।—पुत्त्रः भृत्यः भार्य्या च यस्य वशे अस्ति, तथा अभावेऽपि अतिसन्तोषः, अस्तीति शेषः, असौ महीतले, स्थितोऽपि इति शेषः, स्वर्गस्थः स्वर्गवासी पुरुष इव सुखी भवति इत्यर्थः ॥४२॥

दुष्टेति।—दुष्टा व्यभिचारादिदोषवती भार्य्या, शठं खलःस्वभावं मित्रम्, उत्तरदायकः भृत्यश्च ससर्पे सर्पयुक्ते गृहे वासश्च मृत्युरेव न संशयः मृत्युर्भवति इति तत्र सन्देहो नास्तीत्यर्थः ॥४३॥

मातेति।—यस्य गृहे माता जननी नास्ति मृता इति भावः, भार्य्या च अप्रियवादिनी, अस्तीति शेषः, तेन अरण्यं वनं गन्तव्यम्। यतः तस्य गृहम् अरण्यं यथा तथा, इव इति शेषः, गृहवासापेक्षया तस्य अरण्यवास एव वरं श्रेयान् इति भावः ॥४४॥

ऋणेति।—ऋणकर्त्ता पिता शत्रुः, व्यभिचारिणी माता च

कोकिलानां स्वरो रूपं नारीरूपं पतिव्रता।
विद्या रूपं कुरूपाणां क्षमा रूपं तपस्विनाम् ॥४६॥
अविद्यं जीवनं शून्यं दिक् शून्या चेदबान्धवा।
पुत्रहीनं गृहं शून्यं सर्वशून्या दरिद्रता ॥४७॥
अदाता वंशदोषेण कर्मदोषात् दरिद्रता।
उन्मादो मातृदोषेण पितृदोषेण मूर्खता ॥४८॥

शत्रुः, रूपवती सुन्दरी भार्य्या च शत्रुः, तस्यां परेषां दृष्टिपातसम्भवेन व्यभिचारस्य प्रायशो दर्शनादिति भावः। तथा अपण्डितः मूर्खः पुत्रः शत्रुः, तेन सर्वदैव अपकारकरणसम्भवादिति भावः ॥ ४५ ॥

कोकिलानामिति।—स्वरः, मधुर इति शेषः, कोकिलानां रूपं, पतिव्रताया भावः पतिव्रता भावे ष्ण-प्रत्ययः स्त्रीलिङ्गता च, पातिव्रत्यम् इत्यर्थः, नारीणां रूपं, विद्या कुरूपाणां रूपं, क्षमा तपस्विनां रूपम् ॥ ४६ ॥

अविद्यमिति।—नास्ति विद्या यस्मिन् तत् अविद्यं विद्याहीनं जीवनं शून्यं निष्फलमिति यावत्, दिक् अबान्धवा बन्धुजनरहिता चेत् शून्या अगम्या अनाश्रयणीया च इत्यर्थः, पुत्रहीनं गृहं शून्यम् आकाशमिव न किञ्चित् इत्यर्थः। दरिद्रता दारिद्र्यं निर्धनतेत्यर्थः, सर्वं शून्यं यस्यां तादृशी निर्धनानां सर्वं शून्यमित्यर्थः ॥ ४७ ॥

अदातेति।—वंशदोषेण अदाता कृपणः, कर्मदोषात् यथाकाले विद्यादिशिक्षाविरहादिति भावः, दरिद्रता निर्धनता, मातृदोषेण मातुः गर्भावस्थायां वायुरोगाविर्भावेण इति भावः, उन्मादः क्षिप्तता, तथा पितुर्दोषेण शिक्षाप्रदानानवधानेनेति भावः, मूर्खता, भवतीति शेषः ॥ ४८ ॥

गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः ।
पतिरेको गुरुः स्त्रीणां सर्वस्याभ्यागतो गुरुः ॥४९॥
अतिदर्पे हता लङ्का अतिमाने च कौरवाः ।
अतिदाने बलिर्बद्धः सर्वमत्यन्तगर्हितम् ॥५०॥
वस्त्रहीनस्त्वलङ्कारो घृतहीनञ्च भोजनम् ।
स्तनहीना च या नारी विद्याहीनञ्च जीवनम् ॥५१॥
भोज्यं भोजनशक्तिश्च रतिशक्तिर्वराः स्त्रियः ।
विभवो दानशक्तिश्च नाल्पस्य तपसः फलम् ॥५२॥

गुरुरिति।—अग्निः द्विजातीनां ब्राह्मणक्षत्रियवैश्यानां गुरुः आचार्य्यः तद्वत् सेव्यः तेषामग्निहोत्रविधानादिति भावः। ब्राह्मणः वर्णानां ब्राह्मणक्षत्रियवैश्यशूद्राणां चतुर्णामिव अथवा क्षत्रियवैश्यशूद्राणां त्रयाणां गुरुः शिक्षकः कर्त्तव्यविषयाणां प्रदर्शक इति भावः। एकः केवलः न तु अन्य इत्यर्थः, पतिः स्त्रीणां गुरुः। अभ्यागतः अतिथिः सर्वस्य जनस्य गुरुः सेवनीय इति भावः॥ ४९ ॥

अतीति।—लङ्का अतिदर्पे अत्यहङ्कारे हता नष्टा, कौरवाः कुरुवंशीयाः दुर्य्योधनादय इत्यर्थः, अतिमाने हताः नष्टाः। बलिः विरोचनसुतः अतिदाने बद्धः बन्धनं नीतः, वामनरूपिणा हरिणेति शेषः। अतः अत्यन्तं सर्वं गर्हितं निन्दितम्। अतिवृद्धिर्ध्वंसहेतुरिति भावः॥ ५० ॥

वस्त्रहीन इति।—अलङ्कारः भूषणं वस्त्रहीनः वसनरहितः, भोजनं घृतहीनं हविःशून्यं, या च नारी स्तनाभ्यां हीना पतितस्तनीत्यर्थः, जीवनं विद्याहीनञ्च, न शोभते इति शेषः॥ ५१ ॥

भोज्यमिति।—भोज्यं भक्षणीयद्रव्यं, भोजनशक्तिः आहार

पुत्त्रप्रयोजना दाराः पुत्त्रः पिण्डप्रयोजनः ।
हितप्रयोजनं मित्रं धनं सर्वप्रयोजनम् ॥ ५३ ॥
दुर्लभं प्राकृतं वाक्यं दुर्लभः क्षेमकृत् सुतः ।
दुर्लभा सदृशी भार्य्या दुर्लभः स्वजनः प्रियः ॥५४॥
शैले शैले न माणिक्यं मौक्तिकं न गजे गजे ।
साधवो न हि सर्वत्र चन्दनं न वने वने ॥५५॥

क्षमता, रतिशक्तिः मैथुनशक्तिः, वराः उत्तमाः स्त्रियः, विभवः सम्पत्, दानशक्तिः यथोचितव्ययशीलता इत्यर्थः ; एतत् सर्वम् अल्पस्य तपसः फलं न, अल्पेन तपसा एतत् सर्वं न लभ्यते इति भावः ॥ ५२ ॥

पुत्त्रेति ।—दाराः स्त्रियः पुत्त्रः प्रयोजनं यासां तथाविधाः, "पुत्त्रार्थं क्रियते भार्य्या" इति स्मरणादिति भावः । पुत्त्रः पिण्डप्रयोजनः पिण्डप्राप्तये पुत्त्रोत्पादनमिति भावः । मित्रं सुहृत् हितप्रयोजनं हितानुष्ठानायैव मित्रं सेव्यते इति भावः । धनं सर्वप्रयोजनं सर्वकार्य्यनिष्पादनाय धनमुपार्ज्यते इति भावः ॥५३॥

दुर्लभमिति ।—प्राकृतम् अवितथं सत्यमित्यर्थः, वाक्यं दुर्लभं, "वाक्यम्" इत्यत्र "मित्रम्" इति पाठान्तरं, तथात्वे—प्राकृतं प्रकृतिसिद्धम् अकृत्रिममित्यर्थः । क्षेमकृत् शुभङ्करः सुतः पुत्त्रः दुर्लभः तादृशपुत्त्रस्य दुष्करतपोलभ्यत्वात् । उक्तञ्च,—"पुण्यतीर्थे कृतं येन तपः क्वाप्यतिदुष्करम् । तस्य पुत्त्रो भवेत् वश्यः समृद्धो धार्मिकः सुधीः ॥" इति । सदृशी आत्मानुरूपा समदुःखसुखेति भावः, भार्य्या दुर्लभा दुष्प्रापा । प्रियः प्रीतिकरः स्वजनः आत्मीयवर्गः दुर्लभः ॥ ५४ ॥

शैले इति ।—शैले शैले पर्वते पर्वते प्रतिशैलमित्यर्थः, माणिक्यं रत्नविशेषः न, अस्तीति शेषः । गजे गजे प्रतिगजं

अशोच्यो निर्धनः प्राज्ञोऽशोच्यः पण्डितबान्धवः ।
अशोच्या विधवा नारी पुत्त्रपौत्त्रप्रतिष्ठिता ॥५६॥
अविद्यः पुरुषः शोच्यः शोच्यं मैथुनमप्रजम् ।
निराहाराः प्रजाः शोच्याः शोच्यं राज्यमराजकम्॥५
कुलीनैः सह सम्पर्कं पण्डितैः सह मित्रताम् ।
ज्ञातिभिश्च समं मेलं कुर्वाणो न विनश्यति ॥५८॥
कष्टा वृत्तिः पराधीना कष्टो वासो निराश्रयः ।
निर्धनो व्यवसायश्च सर्वकष्टा दरिद्रता ॥५९॥

मौक्तिकं न, अस्तीति शेषः । साधवः सज्जनाः सर्वत्र सर्वस्मिन् स्थाने न, सन्तीति शेषः । वने वने प्रतिवनं चन्दनं न, अस्तीति शेषः । उत्कृष्टवस्तूनां कादाचित्कसम्भवादिति भावः ॥ ५५ ॥

अशोच्य इति ।—प्राज्ञः पण्डितो जनः निर्धनः दरिद्रः, अपि रत्राध्याहार्य्यः, अशोच्यः न शोचनीयः । पण्डितः प्राज्ञः बान्धवं मित्रं यस्य तादृशः पुरुषः अशोच्यः । नारी विधवा गतभर्तृ काऽपि पुत्त्रपौत्त्रैः प्रतिष्ठिता प्रतिष्ठां गता सत्पुत्त्रपौत्त्रवतीत्यर्थः अशोच्या न शोचनीया तदर्थं शोको न कर्त्तव्य इति भावः ॥५६

अविद्य इति ।—अविद्यः विद्याहीनः पुरुषः शोच्यः । अप्र नास्ति प्रजा सन्तानो यस्मिन् तथाभूतं, "प्रजा स्यात् सन्तत जने" इत्यमरः । मैथुनं सुरतं शोच्यं निष्फलम् इत्यर्थः । निराहार आहारवर्जिताः अप्राप्ताहारा इत्यर्थः, प्रजाः शोच्याः । अराज राजशासनहीनं राज्यं शोच्यं दुःखजनकत्वादिति भावः ॥५७॥

कुलीनैरिति ।—कुलीनैः सत्कुलप्रसूतैः जनैः सह सम्प सम्बन्धं, पण्डितैः सह मित्रतां सौहृद्यं, तथा ज्ञातिभिः समं स मेलं मेलनं कुर्वाणो जनः न विनश्यति ॥ ५८ ॥

कष्टेति ।—पराधीना परवशा वृत्तिः जीविका कष्टा लोक

तस्करस्य कुतो धर्मः ? दुर्जनस्य कुतः क्षमा ? ।
वेश्यानाञ्च कुतः स्नेहः ? कुतः सत्यञ्च कामिनाम् ? ६०
प्रेषितस्य कुतो मानं ? कोपनस्य कुतः सुखम् ? ।
स्त्रीणां कुतः सतीत्वञ्च ? कुतो मैत्री खलस्य च ? ६१
दुर्बलस्य बलं राजा बालानां रोदनं बलम् ।
बलं मूर्खस्य मौनित्वं चौराणामनृतं बलम् ॥६२॥
यो ध्रुवाणि परित्यज्य अध्रुवं परिषेवते ।

दायिनी, निराश्रयः आश्रयशून्यः वासः स्थितिरित्यर्थः, कष्टः क्लेशदः। निर्धनः धनशून्यः व्यवसायः वाणिज्यं, कष्ट इति शेषः। दरिद्रता सर्वकष्टा सर्वविषये कष्टदायिनी इत्यर्थः ॥ ५९ ॥

तस्करस्येति।—तस्करस्य चौरस्य धर्मः कुतः ? न कुतोऽपि धर्मः, अस्तीति शेषः। दुर्जनस्य क्षमा कुतः ? न कुतोऽपि इत्यर्थः। वेश्यानां वाराङ्गनानां स्नेहः अनुरागः कुतः ? नैव कस्मिन्नपि अनुरागः, अस्तीति शेषः। कामिनां कामपरतन्त्राणां सत्यं सत्यवादिता कुतः ? न कुतोऽपि इत्यर्थः ॥ ६० ॥

प्रेषितस्येति।—प्रेषितस्य कार्य्येषु नियुक्तस्य मानं कुतः ? भृत्यत्वादिति भावः। कोपनस्य क्रुद्धस्वभावस्य सुखं कुतः ? न कदापि सुखमस्ति इत्यर्थः। स्त्रीणां सतीत्वं कुतः ? प्रायशः सतीत्वभङ्गदर्शनादिति भावः। खलस्य दुर्जनस्य मैत्री सौहृद्यं कुतः ? नैवास्तीत्यर्थः ॥ ६१ ॥

दुर्बलस्येति।—राजा दुर्बलस्य बलहीनस्य बलं, रोदनं बालानां शिशूनां बलं, मौनित्वं तूष्णीभावः मूर्खस्य बलम्, अनृतम् असत्यं न मया चौर्य्यं कृतमित्येवंरूपमित्यर्थः, चौराणां बलम् ॥६२॥

य इति।—यः जनः ध्रुवाणि निश्चितानि परित्यज्य अध्रुवम्

ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव च ॥६३॥
शुष्कं मांसं स्त्रियो वृद्धा बालार्कस्तरुणं दधि ।
प्रभाते मैथुनं निद्रा सद्यः प्राणहराणि षट् ॥६४॥
सद्यो मांसं नवान्नञ्च बाला स्त्री क्षीरभोजनम् ।
घृतमुष्णोदकञ्चैव सद्यः प्राणकराणि षट् ॥६५॥
सिंहादेकं वकादेकं षट् शुनस्त्रीणि गर्दभात् ।
वायसात् चतुः शिक्षेत चत्वारि कुक्कुटादपि ॥६६॥
प्रभूतमल्पकार्य्यं वा यो नरः कर्त्तुमिच्छति ।

अनिश्चितं परिषेवते आश्रयति, तस्य ध्रुवाणि निश्चितानि वस्तूनि इत्यर्थः, नश्यन्ति, अध्रुवम् अनिश्चितं भविष्यदिति भावः, नष्टमेव तस्य अनिश्चितभविष्यत्वाशाऽपि नश्येदिति भावः ॥ ६३ ॥

शुष्कमिति ।—शुष्कं मासं शुष्कमांसभोजनमित्यर्थः, वृद्धाः स्त्रियः प्राचीनस्त्रीसम्भोग इत्यर्थः, बालार्कः बाला कन्या तत्स्थोऽर्कः सूर्य्यः कन्याराशिस्थसूर्य्यकिरणसेवनमित्यर्थः, तस्य अतितीक्ष्णत्वादिति भावः, तरुणं सप्तरात्रपर्य्युषितं दधि, प्रभाते प्रातःकाले मैथुनं निद्रा च एतानि षट् सद्यः शीघ्रमेव प्राणहराणि जीवननाशकानि ॥ ६४ ॥

सद्य इति ।—सद्यो मांसं तद्भोजनम् इत्यर्थः, नवं नूतनम् अशुष्कमपर्य्युषितम् अन्नं, बाला षोड़शवर्षीया स्त्री, क्षीरभोजनं दुग्धपानं, घृतं हविःपानं, तथा उष्णोदकम् उष्णजलम् एतानि षट् सद्यः अचिरमेव प्राणकराणि प्राणपोषकाणि इत्यर्थः ॥६५॥

सिंहादिति ।—सिंहात् एकं, वकात् एकं, शुनः कुक्कुरात् षट्, गर्दभात् त्रीणि, वायसात् काकात् चतुः चतुष्टयं, तथा कुक्कुटात् चत्वारि अपि शिक्षेत ॥ ६६ ॥

प्रभूतमिति।—यो नरः प्रभूतं महत्,कार्य्यमिति शेषः, अल्प-

सम्यक् यत्नेन तत् कुर्य्यात् सिंहादेकं प्रकीर्त्तितम् ६७
सर्वेन्द्रियाणि संयम्य वकवत् पतितो जनः ।
कालदेशोपपन्नानि सर्वकार्य्याणि साधयेत् ॥६८॥
बह्वाशी स्वल्पसन्तुष्टः सुनिद्रः शीघ्रचेतनः ।
प्रभुभक्तश्च शूरश्च ज्ञातव्याः षट् शुनो गुणाः ॥६९॥
अविश्रामं वहेद्भारं शीतोष्णञ्च न विन्दति ।

कार्य्यं वा कर्त्तुम् इच्छति, स तत् कार्य्यं सम्यक्यत्नेन सम्यक् प्रयत्नेन इत्यर्थः, कुर्य्यात् । एतदेव सिंहादेकं सिंहसकाशादेकं शिक्षणीयम् इत्यर्थः, प्रकीर्त्तितं कथितम् । सिंहः यथा किञ्चिदपि कार्य्यं सम्यक् सम्पादयति तथा सर्वैरेव कार्य्यमारब्धं सम्यक् साधनीयमिति भावः ॥ ६७ ॥

सर्वेन्द्रियाणीति ।—जनः सर्वेन्द्रियाणि संयम्य वशीकृत्य वकवत् पतितः, कार्य्यवस्तुषु इति शेषः, कालदेशोपपन्नानि देशकालसुलभानि इत्यर्थः, सर्वाणि कार्य्याणि साधयेत्, एतदेव वकादेकमिति कीर्त्तितमिति शेषः । वको यथा यथासमये यथास्थाने पतितः मत्स्यादीन् अनायासेन गृह्णाति तथा मानवः कालं देशञ्च विचार्य्य कार्य्यं कुर्वन् चरितार्थतामापद्यते इति तात्पर्य्यार्थः ॥ ६८ ॥

बह्वाशीति ।—बह्वाशी प्रभूतभोजी, तथाऽपि स्वल्पेनैव अन्नादिना इति भावः, सन्तुष्टः, सुनिद्रः क्षणादेव प्रगाढ़-निद्राशीलः, अथच शीघ्रचेतनः किञ्चित् शब्दमात्रेणैव भग्ननिद्र इत्यर्थः, प्रभुभक्तः स्वामिषु अनुरक्तः, शूरः बलवांश्च, श्वेति शेषः, शुनः कुक्कुरात् एते षट् गुणाः बह्वाशित्वादयः ज्ञातव्याः । कुक्कुरदृष्टान्तेन एतान् गुणान् शिक्षेतेति तात्पर्य्यार्थः ॥ ६९ ॥

अविश्राममिति ।—अविश्रामं भारं वहेत्, शीतोष्णं शीतः

ससन्तोषस्तथा नित्यं त्रीणि शिक्षेत गर्दभात् ॥७०॥
गूढ़मैथुनधर्मञ्च काले काले च संग्रहम् ।
अप्रमादमनालस्यं चतुः शिक्षेत वायसात् ॥७१॥
युद्धञ्च प्रातरुत्थानं भोजनं सह बन्धुभिः ।
स्त्रियमापद्गतां रक्षेच्चतुः शिक्षेत कुक्कुटात् ॥७२॥
कोऽतिभारः समर्थानां ? किं दूरं व्यवसायिनाम् ?
को विदेशः सविद्यानां ? कः परः प्रियवादिनाम् ?७३

शीतोष्णं न विन्दति, तथा नित्यं सततं ससन्तोषः सन्तुष्टः, वर्त्तते गर्दभ इति च शेषः। एतानि त्रीणि गर्दभात् शिक्षेत। गर्दभदृष्टान्तेन अविश्रामकार्यकरण-शीतशीतोष्णाज्ञान-सततसन्तोषशालिना भवितव्यमिति तात्पर्यार्थः ॥ ७० ॥

गूढ़ेति।—गूढ़ः यः मैथुनधर्मः सुरतव्यापारः तं, काले काले समये समये सङ्ग्रहं सञ्चयम्, अप्रमादम् अवधानम्, अनालस्यं च एतत् चतुः चतुष्टयम् इत्यर्थः, वायसात् काकात् शिक्षेत। वायसवत् मैथुनं गूढ़मेव कर्त्तव्यं, समये समये अर्थसञ्चयः सावधानता आलस्यत्यागश्च कर्त्तव्य इति तात्पर्यार्थः ॥ ७१ ॥

युद्धमिति।—युद्धं, प्रातःकाले उत्थानं, बन्धुभिः सह भोजनं, कुर्यादिति शेषः, तथा आपद्गतां विपद्ग्रस्तां स्त्रियं रक्षेत्। चतुः एतत् चतुष्टयम् इत्यर्थः, कुक्कुटात् शिक्षेत। कुक्कुटो यथा युद्धप्रातरुत्थानबन्धुसहभोजनापन्नस्त्रीरक्षणं करोति तथा सर्वैरेव मानवैः तत्तत्कार्यं कर्त्तव्यमिति तात्पर्यार्थः ॥ ७२ ॥

क इति।—समर्थानां शक्तानाम् अतिभारः कः ? नास्ति इत्यर्थः। व्यवसायिनां वणिजां दूरं किम् ? नैव किमपि स्थानं दूरं तैः कथ्यते इति भावः। सविद्यानां विदुषां विदेशः कः ? सर्वत्रैव

आपदां कथितः पन्था इन्द्रियाणामसंयमः।
तज्जयः सम्पदां मार्गो येनेष्टं तेन गम्यताम् ॥७४॥
न च विद्यासमो बन्धुर्न च व्याधिसमो रिपुः।
न चापत्यसमः स्नेहो न च दैवात् परं बलम्॥७५॥
समुद्रावरणा भूमिः प्राकारावरणं गृहम्।
नरेन्द्रावरणा देशाश्चरित्रावरणाः स्त्रियः ॥७६॥
घृतकुम्भसमा नारी तप्ताङ्गारसमः पुमान्।
तस्मात् घृतञ्च वह्निञ्च नैकत्र स्थापयेत् बुधः॥७७॥

तेषां पूज्यत्वादिति भावः। प्रियवादिनां परः शत्रुः कः? न कोऽपि इत्यर्थः॥ ७३॥

आपदामिति।—इन्द्रियाणाम् असंयमः अदमनम् आपदां पन्था मार्गः कथितः, तज्जयः इन्द्रियजयः सम्पदां मार्गः, उक्त इति शेषः, येन इन्द्रियजयाजयरूपेण मार्गेण इष्टम् अभिलषितं, गमनम् इति शेषः, तेन मार्गेण गम्यताम् ॥ ७४ ॥

न चेति।—विद्यया समः बन्धुः न, व्याधेः समः रिपुः शत्रुः न, अपत्येन समः अपत्येषु यथा तथा इत्यर्थः, स्नेहः न, दैवात् परं श्रेष्ठं बलञ्च न, अस्तीति शेषः सर्वत्र ॥ ७५ ॥

समुद्रेति।—भूमिः समुद्रः आवरणं यस्यास्तथाभूता समुद्रवेष्टितेत्यर्थः। गृहं प्राकारः प्राचीरः आवरणं यस्य तथोक्तम्। देशाः नरेन्द्रः राजा आवरणं येषां तथाविधाः राजरक्षिता इत्यर्थः, स्त्रियः चरित्रमेव आवरणं यासां तादृश्यः चरित्ररक्षिता इत्यर्थः॥ ७६ ॥

घृतेति।—नारी घृतकुम्भेन समा स्वल्पतापेनैव विलयनस्वभावा इत्यर्थः, पुमान् तप्ताङ्गारेण ज्वलदङ्गारेण समः यः

आहारो द्विगुणः स्त्रीणां बुद्धिस्तासां चतुर्गुणा।
षड्गुणो व्यवसायश्च कामश्चाष्टगुणः स्मृतः ॥७८॥
जीर्णमन्नं प्रशंसीयात् भार्य्याञ्च गतयौवनाम्।
रणात् प्रत्यागतं शूरं शस्यञ्च गृहमागतम् ॥७९॥
असन्तुष्टा द्विजा नष्टाः सन्तुष्टा इव पार्थिवाः।
सलज्जा गणिका नष्टा निर्लज्जाश्च कुलस्त्रियः ॥८०॥
अवंशपतितो राजा मूर्खपुत्त्रश्च पण्डितः।
अधनेन धनं प्राप्य तृणवत् मन्यते जगत् ॥८१॥

सान्निध्यमात्रेणैव द्रावयतीति भावः, तस्मात् बुधः पण्डितः जनः एकत्र एकस्मिन् स्थाने घृतञ्च वह्निञ्च नारीं नरञ्चेत्यर्थः, न स्थापयेत् न रचेत्॥ ७७॥

आहार इति।—स्त्रीणाम् आहारः द्विगुणः, तासां स्त्रीणां बुद्धिः चतुर्गुणा, व्यवसायः उद्योगः षड्गुणः, तथा कामः अष्टगुणः स्मृतः कथितः, पुरुषापेक्षयेति सर्वत्र योज्यम्॥ ७८॥

जीर्णमिति।—जीर्णं पुरातनम् अन्नं तण्डुलादिकं, गतम् अतीतं निर्दोषेणेति भावः, यौवनं यस्याः तादृशीं भार्य्यां, रणात् संग्रामात् प्रत्यागतं प्रतिनिवृत्तं रणजयेनेति भावः, शूरं, तथा गृहम् आगतं शस्यञ्च न तु क्षेत्रस्थितं तस्य बहुविघ्नसम्भवादिति भावः, प्रशंसीयात् साधुत्वेन कीर्त्तयेदित्यर्थः॥ ७९॥

असन्तुष्टा इति।—असन्तुष्टाः द्विजाः ब्राह्मणाः सन्तुष्टाः पार्थिवाः राजान इव नष्टाः नाभ्युदयं लभन्ते इति भावः। गणिकाः वेश्याः सलज्जाश्चेत् नष्टाः विफलाः, भवन्तीति शेषः। कुलस्त्रियः कुलवध्वः निर्लज्जाश्चेत् नष्टाः शङ्कितव्यभिचारतया लोकैर्नाद्रियन्ते इति भावः॥ ८०॥

अवंशेति।—अवंशे दुष्कुले पतितो जात इत्यर्थः, राजा,

ब्रह्महापि नरः पूज्यो यस्यास्ति विपुलं धनम् ।
शशिनस्तुल्यवंशोऽपि निर्धनः परिभूयते ॥ ८२ ॥
पुस्तकस्था तु या विद्या परहस्तगतं धनम् ।
कार्य्यकाले समुत्पन्ने न सा विद्या न तद्धनम् ॥८३॥
पादपानां भयं वातात् पद्मानां शिशिराद् भयम् ।
पर्वतानां भयं वज्रात् साधूनां दुर्जनाद् भयम् ॥८४॥
प्राज्ञे नियुज्यमाने तु सन्ति राज्ञस्त्रयो गुणाः ।
यशः स्वर्गनिवासश्च विपुलश्च धनागमः ॥ ८५ ॥

मूर्खस्य पुत्रः पण्डितः, अधनस्य दरिद्रस्य धनं प्राप्य जगत् तृणवत् मन्यते ॥ ८१ ॥

ब्रह्महापीति ।—यस्य विपुलं प्रभूतं धनम् अस्ति, स नरः ब्रह्महापि ब्राह्मणघाती अपि पूज्यः, सर्वैरादियते इति भावः । शशिनः चन्द्रस्य तुल्यवंशोऽपि समुज्ज्वलकुलोत्पन्नोऽपीत्यर्थः, नरः निर्धनश्चेत् परिभूयते तिरस्क्रियते, न केनापि आद्रियते इति भावः ॥ ८२ ॥

पुस्तकस्थेति ।—या विद्या पुस्तकस्था न तु अभ्यस्तेति भावः, यत् धनं परहस्तगतं न तु स्वसन्निधौ स्थितमिति भावः, कार्य्यकाले समुत्पन्ने आगते सा विद्या न, तत् धनञ्च न, निष्फलत्वादिति भावः ॥ ८३ ॥

पादपानामिति ।—पादपानां वृक्षाणां वातात् भयं, पद्मानां शिशिरात् भयं, पर्वतानां वज्रात् भयं, साधूनां दुर्जनात् भयं वर्त्तते इति सर्वत्र योज्यम् ॥ ८४ ॥

प्राज्ञे इति ।—प्राज्ञे विदुषि नियुज्यमाने सति, राजकर्मणि

मूर्खे नियुज्यमाने तु त्रयो दोषा महीपतेः।
अयशश्चार्थनाशश्च नरके गमनं तथा ॥ ८६ ॥
बहुभिर्मूर्खसङ्घातैरन्योन्यपशुवृत्तिभिः।
प्रच्छाद्यन्ते गुणाः सर्वे मेघैरिव दिवाकरः ॥८७॥
यस्य क्षेत्रं नदीतीरे भार्य्या वापि परप्रिया।
पुत्त्रस्य विनयो नास्ति मृत्युरेव न संशयः ॥८८॥
असम्भाव्यं न वक्तव्यं प्रत्यक्षमपि दृश्यते।
शिला तरति पानीयं गीतं गायति वानरः ॥८९॥
सुभिक्षं कृषके नित्यं नित्यं सुखमरोगिणि।

इति शेषः, राज्ञः यशः कीर्त्तिः स्वर्गनिवासः विपुलः महान् धनागमश्च एते त्रयो गुणाः सन्ति ॥ ८५ ॥

मूर्खे इति।—मूर्खे नियुज्यमाने सति, राजकर्मणि इति शेषः. महीपतेः राज्ञः अयशः अकीर्त्तिः अर्थनाशः तथा नरके गमनम् एते त्रयो दोषाः, भवन्ति इति शेषः ॥ ८६ ॥

बहुभिरिति।—अन्योन्यं परस्परं पशूनामिव वृत्तिर्व्यवहारो येषां तथाभूतैः बहुभिः मूर्खसङ्घातैः मूर्खसमूहैः मेघैः दिवाकरः सूर्य्य इव सर्वे गुणाः, गुणिनामिति शेषः, प्रच्छाद्यन्ते तिरोधीयन्ते ॥ ८७ ॥

यस्येति।—यस्य नदीतीरे क्षेत्रं भूमिः. भार्य्या च परप्रिया परानुरक्ता इत्यर्थः, पुत्त्रस्य च विनयो नास्ति, तस्य मृत्युरेव न संशयः सन्देहो नास्ति इत्यर्थः ॥ ८८ ॥

असम्भाव्यमिति।—प्रत्यक्षमपि दृश्यते यत् तत् असम्भाव्यम् अभावनीयञ्चेत् न वक्तव्यम् उपहासजनकत्वादिति भावः। यथा शिला पानीयं तरति. वानरः गीतं गायति ॥ ८९ ॥

सुभिक्षमिति।—नित्यं सततं कृषके कृषिकर्मशीले इत्यर्थः

भार्य्या भर्त्तुः प्रिया यस्य तस्य नित्योत्सवं गृहम् ॥९०॥
हेला स्यात् कार्य्यनाशाय बुद्धिनाशाय निर्धनम् ।
याचना माननाशाय कुलनाशाय भोजनम् ॥९१॥
सेवितव्यो महावृक्षः फलच्छायासमन्वितः ।
यदि दैवात् फलं नास्ति छाया केन निवार्य्यते ?॥९२॥
प्रथमे नार्जिता विद्या द्वितीये नार्जितं धनम् ।
तृतीये नार्जितं पुण्यं चतुर्थे किं करिष्यति ? ॥९३॥
नदीकूले च ये वृक्षाः परहस्तगतं धनम् ।
कार्य्यं स्त्रीगोचरं यत् स्यात् सर्वं तद्विफलं भवेत् ॥९४॥

सुभिक्षं सुलभमन्नमित्यर्थः सर्वदा कर्षणकारिणोऽन्नाभावो न विद्यते इति भावः। नित्यं सततम् अरोगिणि स्वस्थे जने इत्यर्थः, सुखं भवतीति शेषः। यस्य भर्त्तुः भार्य्या प्रिया प्रीतिकरी तस्य गृहं नित्यः सततः उत्सवः आनन्दो यत्र तथाभूतं, भवतीति शेषः॥ ९० ॥

हेलेति।—हेला आलस्यमित्यर्थः, कार्य्यनाशाय, निर्धनं धनाभावः बुद्धिनाशाय, याचना भिक्षा माननाशाय, भोजनम् अस्थाने इति भावः, कुलनाशाय भवतीति सर्वत्र योज्यम् ॥९१॥

सेवितव्य इति।—फलच्छायासमन्वितः फलवान् छायावांश्च महावृक्षः सेवितव्यः आश्रयणीयः। यदि दैवात् फलं न अस्ति न भवति, छाया केन निवार्य्यते ? ॥ ९२ ॥

प्रथमे इति।—प्रथमे शैशवे इति भावः, विद्या न अर्जिता न शिक्षिता, द्वितीये यौवने इति भावः, धनं न अर्जितं, तृतीये प्रौढ़त्वे पुण्यं धर्मं इत्यर्थः, न अर्जितं न अनुष्ठितं, यदि जनेनेति सर्वत्र योज्यं, तदा चतुर्थे वार्द्धके किं करिष्यति, जन इति शेषः ॥९३॥

नदीति।—ये वृक्षाः नदीकूले, वर्त्तन्ते इति शेषः, यच्च धनं

कुदेशमासाद्य कुतोऽर्थसञ्चयः ?
कुपुत्त्रमासाद्य कुतो जलाञ्जलिः ? ।
कुगेहिनीं प्राप्य गृहे कुतः सुखम् ?
कुशिष्यमध्यापयतः कुतो यशः ? ॥ ९५ ॥

कूपोदकं वटच्छाया श्यामा स्त्री चेष्टकालयम् ।
शीतकाले भवेदुष्णं ग्रीष्मकाले च शीतलम् ॥ ९६ ॥

विषं चङ्क्रमणं रात्रौ विषं राज्ञोऽनुकूलता ।

परहस्तगतं न तु स्वायत्तमित्यर्थः, यच्च कार्य्यं स्त्रीगोचरं स्त्रिया विदितमित्यर्थः, स्यात् तत् सर्वं विफलं भवेत् । नदीकूलस्थवृक्षा हि प्रायशः कूलभङ्गे निपतन्ति कथं तेषां फलाशेति, परहस्तगतधनस्य व्यवहारायोगात् वैफल्यं स्वत एव भवतीति, कार्य्यस्य स्त्रीगोचरत्वे तद्बाधया तत्कार्य्यहानिरिति च भावः ॥ ९४ ॥

कुदेशमिति ।—कुदेशम् आसाद्य प्राप्य गत्वेत्यर्थः, अर्थसञ्चयः धनसङ्ग्रहः कुतः ? नैव भवतीत्यर्थः । कुपुत्त्रम् आसाद्य परिपोष्य इत्यर्थः, स्थितस्येति शेषः, जलाञ्जलिः तर्पणजललाभः इत्यर्थः, कुतः ? नैव भवतीत्यर्थः । कुगेहिनीं कुत्सितां दुष्टां, निर्गुणामिति भावः, गेहिनीं भार्य्यां प्राप्य गृहे सुखं कुतः ? नैव भवतीत्यर्थः । कुशिष्यम् अध्यापयतः पाठयतः यशः कुतः नैव भवतीत्यर्थः ॥ ९५ ॥

कूपोदकमिति ।—कूपोदकं कूपजलं, वटवृक्षस्य छाया, श्यामा "शीते सुखोष्णसर्वाङ्गी ग्रीष्मे च सुखशीतला । तप्तकाञ्चनवर्णाभा सा श्यामा परिकीर्त्तिता" इत्युक्तलक्षणा स्त्री, केचित् तु श्यामा कृष्णवर्णेत्याहुः । इष्टकालयम् इष्टकनिर्मितं गृहम् । एतत् सर्वं शीतकाले उष्णम् उष्णकाले च शीतलं भवेत् ॥ ९६ ॥

विषमिति ।—रात्रौ चङ्क्रमणं पुनःपुनरतिशयेन वा भ्रमणं विषं विषवदनिष्टकरमित्यर्थः, तत्र नानाविपत्पातसम्भवादिति

विषं स्त्रियोऽप्यन्यहृदो विषं व्याधिरवीक्षितः ॥९७॥
दुरधीता विषं विद्या अजीर्णे भोजनं विषम् ।
विषं गोष्ठी दरिद्रस्य वृद्धस्य तरुणी विषम् ॥९८॥
प्रदोषे निहतः पन्थाः पतिता निहताः स्त्रियः ।
अल्पवीजं हतं चेत्रं भृत्यदोषात् हतः प्रभुः ॥९९॥
हतमश्रोत्रियं श्राद्धं हतो यज्ञस्त्वदक्षिणः ।
हता रूपवती वन्ध्या हतं सैन्यमनायकम् ॥१००॥

भावः । राज्ञः अनुकूलता राज्ञः अनुकूलत्वेन सर्वेषाम् अमात्यादीनां शत्रुत्ववृद्धिरित्यर्थः, विषं, तत्र राजकोपेन प्राणहानिसम्भवादिति भावः । अन्यहृदः अन्यासक्ताः स्त्रियः विषं, तत्र सततमसुखं प्राणहानिश्च सम्भवतीति भावः । अवीक्षितः अनवलोकितः अचिकित्सित इत्यर्थः, व्याधिः विषं, तत्र प्राणहानिरवश्यम्भाविनीति भावः ॥ ९७ ॥

दुरधीतेति ।—दुरधीता दुःशिक्षिता विद्या विषं, विपरीतफलकत्वादिति भावः । अजीर्णे अपरिपाके भोजनं विषं, रोगजनकत्वादिति भावः । दरिद्रस्य गोष्ठी सभा विषं, सभायां जनतासन्निधौ सम्मानरक्षणोपयोगिवसनभूषणाद्यभावस्य लज्जाऽवज्ञादिजनकत्वेन मृत्युतुल्यत्वादिति भावः । वृद्धस्य जनस्य तरुणी युवती भार्य्या विषं तस्या मनोरञ्जने असामर्थ्यात् तन्निबन्धना भूयसी अनर्थपरम्परा भवेदिति भावः ॥ ९८ ॥

प्रदोषे इति ।—प्रदोषे रजन्यां पन्थाः निहतः नष्टः, दर्शनागोचरत्वादिति भावः। पतिताः पापरताः स्त्रियः निहता नष्टाः, अकिञ्चित्करत्वादिति भावः । अल्पं वीजं यस्मिन् तत् चेत्रं हतं नष्टं, निष्फलमित्यर्थः। प्रभुः स्वामी भृत्यदोषात् हतः नष्टः ॥९९॥

हतमिति ।—नास्ति श्रोत्रियः वेदपारगः ब्राह्मणः यस्मिन्

वेदवेदाङ्गतत्त्वज्ञो जपहोमपरायणः ।
आशीर्वादवचोयुक्त एष राजपुरोहितः ॥१०१॥
कुलशीलगुणोपेतः सर्वधर्मपरायणः ।
प्रवीणः प्रेषणाध्यक्षो धर्माध्यक्षो विधीयते ॥१०२॥
आयुर्वेदकृताभ्यासः सर्वेषां प्रियदर्शनः ।
आर्य्यशीलगुणोपेत एष वैद्यो विधीयते ॥१०३॥

तत् "श्रोत्रियच्छान्दसौ समौ" इत्यमरः। श्राद्धं पितृद्देशेन दत्तमन्नादिकं हतं नष्टं विफलमित्यर्थः। नास्ति दक्षिणा यत्र तादृशः यज्ञः हतः नष्टः विफल इत्यर्थः। रूपवती सुन्दरी भार्य्या वन्ध्या गर्भधारणशक्तिविहीना चेत् हता नष्टा विफला इत्यर्थः। अनायकम् अस्वामिकं सैन्यं हतं नष्टम् अनायासेन शत्रुभिः पराजेयत्वादिति भावः ॥ १०० ॥

वेदेति।—वेदानाम् ऋग्यजुःसामाथर्वाख्यानां चतुर्णां, वेदाङ्गानां शिक्षाकल्पव्याकरणनिरुक्तच्छन्दोज्योतिषां तत्त्वं जानातीति तथोक्तः जपहोमपरायणः मन्त्रजपयागानुष्ठाननिरतः आशीर्वादवचोयुक्तः मङ्गलकर इत्यर्थः, जनः एष राजपुरोहितः भवतीति शेषः ॥ १०१ ॥

कुलेति।—कुलं, शीलं चरित्रं, गुणाः विद्यादयः, तैः उपेतः युक्तः सर्वधर्मपरायणः नानाधर्मकार्य्यनिरतः प्रवीणः अभिज्ञः विचक्षण इत्यर्थः, प्रेषणाध्यक्षः भृत्यानां कार्य्येषु नियोजने प्रभुः आदेशकर इत्यर्थः, जन इति शेषः, धर्म्माध्यक्षः धर्म्माधिकरणे विचारक इत्यर्थः,विधीयते क्रियते, राज्ञेति शेषः ॥ १०२ ॥

आयुर्वेदेति।—आयुर्वेदे चिकित्साशास्त्रे कृतः अभ्यासः शिक्षा येन तथोक्तः सर्वेषां प्रियदर्शनः सुदर्शनः आर्य्यशीलं सुचरित्रं गुणाः दयादयः तैरुपेतः युक्तः एष जनः वैद्यः विधीयते क्रियते, जनेनेति शेषः। एतादृशवैद्येन चिकित्सा कार्य्या इति भावः॥१०३॥

सकृदुक्तगृहीतार्थो लघुहस्तो जिताक्षरः।
सर्वशास्त्रसमालोकी प्रकृष्टो नाम लेखकः॥१०४॥
समस्तनीतिशास्त्रज्ञो वाहने पूजितश्रमः।
शौर्य्यवीर्य्यगुणोपेतः सेनाध्यक्षो विधीयते॥१०५॥
मेधावी वाक्पटुः प्राज्ञः परचित्तोपलक्षकः।
धीरो यथोक्तवादी च एष दूतो विधीयते॥१०६॥
पुष्पपौष्पगुणोपेतः शास्त्रज्ञो मिष्टपाचकः।
शूरश्च कठिनश्चैव सूपकारः स उच्यते॥१०७॥

सकृदिति।—सकृत् एकवारम् उक्तेन कथनेन गृहीतः विदितः अर्थो येन तथोक्तः लघुहस्तः क्षिप्रहस्तः जितानि वशीकृतानि अक्षराणि येन तथाभूतः द्रुताक्षरपाठक इत्यर्थः, सर्वाणि शास्त्राणि समालोकते पश्यतीति तथोक्तः सर्वशास्त्रद्रष्टा इत्यर्थः, जन इति शेषः, प्रकृष्टः उत्कृष्टः लेखकः नाम, भवतीति शेषः॥१०४॥

समस्तेति।—समस्तनीतिशास्त्रज्ञः सर्वनयविचक्षणः वाहने अश्वादौ पूजितश्रमः प्रशंसितपरिश्रम अश्वाद्यारोहणे लब्धप्रतिष्ठ इत्यर्थः, शौर्य्यं बलं वीर्य्यं पराक्रमः गुणाः विवेकादयश्च तैरुपेतः युक्तः, जनः इति शेषः, सेनाध्यक्षः सेनापतिः विधीयते क्रियते, राज्ञेति शेषः। तादृशसेनाध्यक्षस्य परमोपकारित्वादिति भावः॥ १०५॥

मेधावीति।—यः मेधावी स्मृतिमान् वाक्पटुः सुवक्ता प्राज्ञः पण्डितः परस्य चित्तोपलक्षकः चित्तज्ञः परहृदयानुसारेण प्रस्तोता इत्यर्थः, धीरः धैर्य्यवान् सहिष्णुरित्यर्थः, यथोक्तवादी अवितथवाक् भवति एषः दूतः सन्देशहरो विधीयते क्रियते॥१०६॥

पुष्पेति।—पुष्पाः पौष्पाः गुणाः दयादयश्च तैरुपेतः एतेन

इङ्गिताकारतत्त्वज्ञो बलवान् प्रियदर्शनः ।
अप्रमादी सदा दक्षः प्रतीहारः स उच्यते ॥१०८॥
यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम्?।
लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति?॥१०९
किं करिष्यन्ति वक्तारः श्रोता यत्र न विद्यते?।
नग्नक्षपणके देशे रजकः किं करिष्यति? ॥११०॥

इति चाणक्यशतकं समाप्तम् ।


लोकान् प्रति यत्नवत्त्वमस्य सूचितम्। शास्त्रज्ञः पाकस्येति भावः। मिष्टपाचकः मधुरपाककर्त्ता शूरः बलवान् कठिनः दृढदेहश्च यः भवति, स सूपकारः पाचकः उच्यते कथ्यते सुपाचकतया प्रशस्यते इत्यर्थः॥ १०७॥

इङ्गितेति।—यः इङ्गितम् आशयः आकारः आकृतिः तयो-स्तत्त्वं भावं जानातीति तथोक्तः बलवान् प्रियदर्शनः सदा अप्रमादी अवहितः तथा दक्षः चतुरः भवति, स प्रतीहारः दौवारिक उच्यते प्रशस्यते॥ १०८॥

यस्येति।—यस्य स्वयं स्वतः इत्यर्थः, प्रज्ञा बुद्धिः नास्ति, तस्य शास्त्रं किं करोति? न किमपि इत्यर्थः। लोचनाभ्यां नेत्राभ्यां विहीनस्य अन्धस्य इत्यर्थः, दर्पणः किं करिष्यति? न किमपि इत्यर्थः॥ १०९॥

किमिति।—यत्र श्रोता न विद्यते तत्र वक्तारः किं करि-ष्यन्ति? नैव किमपि इत्यर्थः। नग्नाः विवसनाः क्षपणकाः बौद्धसन्न्यासिनः यत्र तादृशे देशे रजकः किं करिष्यति? वस्त्रा-भावेन तत्क्षालनकार्य्यस्य असत्त्वादिति भावः॥ ११०॥

इति श्रीजीवानन्दविद्यासागरभट्टाचार्य्यविरचिता
चाणक्यशतकटीका समाप्ता।



Jibananda Vidyasagara B.A.

श्रीजीवानन्द विद्यासागर

श्री जीवानन्द विद्यासागर